स्तोत्र

क्र. ११८८

संस्कृत

प्रदोष स्तोत्र

६१८। श्लो. ११२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥इतिप्रदोषस्तोत्रप्रारंभः॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

श्रीगणेशायनमः॥सत्यंब्रविमिपरलोकहितंब्रविमि॥सारंब्र
विम्युपनिषद्धृदयंब्रवीमि॥संसारमुल्बणमसारमवाप्यजं
तो॥सारोयमीश्वरपदांबुरुहस्यसेवा॥१॥येनार्चयंतिगिरि
शंसमयेप्रदोषे॥येनार्चितंशिवमपिप्रणमंतिचान्ने॥एत
त्कथांश्रुतिपुटैर्नपिबंतिमूढा॥स्तेजन्मजन्मनिभवंतिनरा
दरिद्राः॥२॥येवैप्रदोषसमयेपरमेश्वरस्य॥कुर्वंतिनान्यम
नसोघ्रिंसरोजपूजा॥नित्यंप्रवध्धधनधान्यकलत्रपु
त्र॥सोभाग्यसंपदधिकास्तइहैवलोके॥३॥कैलासशै

" Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

लशिखरेत्रिजगज्जनित्री॥गोरींनिवेश्यकनकांचितरत्नपि
(2A) ठे॥न्रत्यंविधानुमभिवांछतिशूलपाणे॥देवाःप्रदोषसमये
नुभजंतिसर्वे॥४॥वाग्देवीधृतवल्लकीशतमखोवेणुर्दधःप
द्मज॥स्तालोनिंदकरोरमाभगवतिगेयःप्रयोगान्विता॥विष्णुः
सांगमृदांगवाजनपटुर्देवाःसमंतःस्थिता॥सेवंतेमनःप्रदो
षसमयेदेवोमृडानीपति॥५॥गंधर्वयक्षपतगोरगसिद्ध
साध्य॥विद्याधरामरवराप्सरसांगणाश्च॥येन्येस्त्रिलोकनि
लयाःसहभूतवर्गाः॥प्राप्तेप्रदोषसमयेहरपार्श्वसंस्थः॥६॥

(3) ॐअतः प्रदोषे शिव एक एव पूज्योथ नान्ये हरिपद्मजाद्याः॥ तस्मि
न्महेशे विधिनेज्यमाने सर्वे प्रसीदंति सुराधिनाथः॥७॥ एषते तन
यः पूर्वजन्मनी ब्राह्मणोत्तमः॥ प्रतिग्रहैर्वयो निन्ये न दानाद्यैः सुक
र्मभिः॥८॥ अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि॥ तद्दोष
परिहारार्थं शरणं पाहि शंकरं॥९॥ इति स्कंदपुराणे ब्रह्मोत्तरखंडे
प्रदोषस्तोत्रं संपूर्णं॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ २

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com